 ISSN: 2349-6002

# ।। निरुक्तोक्त सिद्धान्तानामाधारेण मन्त्राणां सार्थकत्व निरूपणम् ।।

दवे लखनकुमार लाभशंकरभाई

*शोधच्छात्रः, संस्कृतविभागः, भाषासाहित्यभवनम्, गुजरात विश्वविद्यालयः*

*doi.org/10.64643/IJIRTV12I8-191473-459*

शोधसारांशः - भारतीयसंस्कृतेः मूलाधाररुपेण स्थितानां वेदानां रक्षणार्थं षडङ्गानां रचना जाता । तेषु अन्यतमं श्रोत्रस्थानीयं निरुक्तम् । निरुक्तस्य विविधेषु प्रयोजनेषु मन्त्रार्थावबोधनमप्येकः प्रयोजनिविशेषः यथोक्तं निरुक्ते यास्केन ‘‘अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते’’ अर्थात् विना निरुक्तेन मन्त्राणां अवबोधः भवितुं नार्हति । तेषां मन्त्राणां विषये प्राचीनकालादेव द्वौ मतौ प्रचलितो स्तः । यथा

१. अनर्थकाः मन्त्राः इति प्रथमः पक्षः

२. मन्त्राणामर्थत्वमस्तीति द्वितियः पक्षः

तत्र प्रथमपक्षस्य प्रवक्तृरुपेण निरुक्ते यास्केन कौत्सस्य मतनिरुपणं कृतमस्ति यथा ‘‘यदिमन्त्रार्थप्रत्ययायानर्थकं भवतीति कौत्सोऽनर्थकाः हि मन्त्राः’’ ......। कौत्सस्य मतानुसारं मन्त्राः अनर्थकाः एव यतोहि नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्ति इत्युक्त्वा कौत्सः कथयति मन्त्रेषु निश्चितक्रमे एव शब्दाः प्रयुक्तास्सन्ति तेषां निर्धारितक्रमे एव उच्चारणं करणीयं तथा च यदि सार्थकाः मन्त्राः तदानिं तु समानार्थकेन शब्देन अपि मन्त्रः वक्तुं शक्यते यथा अग्निम् ईळे इत्यस्यापेक्षया वह्निं स्तौमि इत्यस्यापि प्रयोगः कर्तुं शक्यते । इत्यादिभिः मतैस्सह कौत्सः स्वमतमुपस्थापयति तदनन्तरं यास्केन कौत्समतखण्डनपुरस्सरं द्वितीयपक्षरुपेण ‘‘अर्थवन्तः शब्दसामान्यात्’’ इत्यादि निरुपणपुरस्सरं स्वमतोपस्थापनं कृतमस्ति । इत्थं मन्त्राणामर्थत्वानर्थकत्वविषये निरुक्ते निरुपणं दृश्यते तदनुसारं अस्मिन् शोधपत्रे द्वयोः सिद्धान्तयोर्निरूपणपुरस्सरं मन्त्राणामर्थत्वं कथं सिद्धमिति प्रतिपादयिष्यते ।

## शोधकार्यस्योद्देश्यानि

- प्रस्तुत शोधकार्येण किमर्थं मन्त्राः सार्थकाः ? इति वैज्ञानिक कारणैः सह ज्ञानं भविष्यति ।
- कौत्सादि प्राचीनाचार्याः मन्त्राणामनर्थकत्वं केनाधारेण प्रवदन्ति ? तस्यापि ज्ञानं भविष्यति ।
- मन्त्रार्थविषये प्रसिद्धयोः द्वयोः पक्षयोः ज्ञानं भविष्यति ।
- निरुक्तशास्त्रस्योपादेयता सिद्ध्यति ।
- मन्त्रार्थज्ञाने आवश्यकतत्वानामनुसन्धानं भविष्यति ।

## प्रस्तावना

भारतीयसंस्कृतेः समस्ततत्त्वानां मूलाधाररूपेण चत्वारो वेदाः वर्तन्ते । तेषां वेदानां रक्षणार्थं विविधानां पाठ-पद्धतिनां रचना जाता । समयान्तरे तेषां रक्षणार्थं षडङ्गानां रचना जाता । तानि च षडङ्गानि यथा

‘‘शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु’’ ।।[1]

अङ्गेति पदेनोपकारकाः वेदार्थज्ञानार्थमेते इत्यर्थो लभ्यते । वेदानां भाषा-भावश्च उभावपि सरलतया ज्ञातुं न शक्यते अतो वेदार्थावगमनाय वेदाङ्गानां महत्यावश्यकता वर्तते । एतेषु प्रत्येकस्याङ्गस्य वेदपुरुषस्य भिन्न-भिन्नशरीरावयवरुपेण कल्पना कृताऽस्ति ।

‘‘छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्
तस्मात् साङ्गमधीत्येवं ब्रह्मलोके महीयते’’ ।।[2]

तेषु निरुक्तवेदाङ्गस्य श्रोत्रत्वेन कल्पना कृताऽस्ति निरुक्तं नाम ‘‘निरुच्यते निश्शेषेणोपदिश्यते तत्तदर्थावबोधनाय पदजातं यत्र तन्निरुक्तमिति’’ यतोहि लोके सम्यक् श्रुत्वैवार्थबोधो भवति तथैव वेदमन्त्राणामपि सम्यगर्थज्ञानार्थं निरुक्ताध्ययनपुरस्सरं विविधपदानामर्थज्ञानं यदा भवति तदानीमेववेदार्थज्ञानं भवत्यतो निरुक्तं श्रोत्रत्वेन कल्पितम् । प्रायः पुराकाले विविधैः आचार्यैः स्वस्य निघण्टवः रचिताः तेषां निर्वचनमपि कृतमासीत् किन्तु साम्प्रतम् यास्कप्रणीतम् निरुक्तमेव सम्पूर्णरुपेण प्राप्यते ।

---

[1] पाणिनीय शिक्षा.

[2] पाणिनीय शिक्षा

तादृशेऽस्मिन् निरुक्ते यास्काचार्यैः नैकविधप्राचीनार्वाचीनपरम्परानां मतानां निरूपणं कृतमस्ति तादृश एवैकः प्रसिद्धो विषयो वर्तते मन्त्राणां सार्थकत्वम् उत निरर्थकत्वम् इति । तादृशेऽस्मिन् विषये यास्काचार्यैः निरुक्ते प्रथमाध्याय एव पूर्वाचार्यमतनिरूपणपुरस्सरं स्वमतप्रस्थापितः । तयोरुभयोरपि मतयोः समीक्षास्मिन् शोधपत्रे क्रियते ।

वेदोक्तमन्त्राणां योऽर्थोऽस्माकं तत्वदर्शिभि ऋषिभिः दृष्टस्तस्यार्थस्य तथैव ज्ञानं भवेदित्येव निरुक्तशास्त्रस्य चरमोद्देश्यम् । अत एतस्य सिद्ध्यर्थं मन्त्राणामर्थवत्तादौ साधनीया भविष्यति यतोहि मन्त्रा अनर्थका एव इति यदि मन्यते तदानीं त्वर्थज्ञानस्यावश्यकतैव नास्त्यतो यास्कः प्राचीनाचार्याणां मतं खण्डयित्वा मन्त्राणां सार्थकता स्थापयति तर्हि के पुनः मन्त्राणां निरर्थकतां प्रतिपादयन्ति किं ते नास्तिका उत आस्तिका इति प्रश्नो मनसि समुदेति ।

निरुक्ते कौत्सर्षिरेव मन्त्राणामानर्थक्यं प्रतिपादयति "अनर्थकाः हि मन्त्राः । इति कौत्सः" [3] तदानीं प्रश्नो भवति ऋषिर्भूत्वा मन्त्राणामानर्थक्यं यदि स्वीक्रियते तदानीं तु ते चार्वाकोपासका एव किन्तु तथा नास्ति तेषां मते मन्त्रानर्थकाः न तु वेदानां सत्ताया उपरि ते शङ्काङ्कुर्वन्ति । एवञ्च मन्त्राणां यदानर्थक्यं तैः प्रोक्तं तस्यार्थ एवं नास्ति यन्मन्त्राः कर्मफलप्रदातुमक्षमा इति तेषां मते तु मन्त्रास्त्वौषधिरूपाः वर्तन्ते यदि ज्ञानं विनाप्यौषधस्य सेवनं क्रियते तदानीमपि ज्वरनिवृत्तिस्तु भवत्येव तथैव मन्त्राणां कोऽप्यर्थो नास्ति किन्तु फलं तु वर्तत एवातोर्थस्यावश्यकतैव नास्ति विनार्थेनैव मन्त्राः फलदायकाः भवन्तीति कौत्सस्य मतम् ।

कौत्सः स्वमतनिरूपणार्थं विविधाभिः युक्तिभिः मन्त्राणां सार्थकतायाः निषेधं करोति तदिदानीमेकैक युक्तिभिस्सह पश्यामः ।

"नियतवाचो युक्तयो नियतानुपूर्व्या भवन्ति" । [4] अर्थात् मन्त्राः निश्चित् शब्दानां योजनया भवन्ति तथा च नियतानुपूर्व्या अर्थात् तेषां क्रमो निर्धारितो भवति । अस्याशयः कौत्सस्यास्ति यन्मन्त्रेषु ये शब्दाः प्रयुक्तास्सन्ति तेषां स्थानेऽन्यः तत्सदृशस्यैव शब्दस्यापि प्रयोगः कर्तुं न शक्यते यथा प्रसिद्धमिदमुदाहरणं यत् "अग्निमीळे पुरोहितम्" ...।[5] इत्येतस्मिन् मन्त्रेऽग्निशब्दस्य स्थाने वह्निमिति प्रयोगः कर्तुं न शक्यते वह्नि इत्यपि शब्दः अग्निवाचक एव किन्तु मन्त्रे तस्य प्रयोगः कर्तुं न शक्यते यतोहि सार्थकेषु शब्देषु समानार्थकशब्दानां प्रायेण सर्वत्र प्रयोगोदृश्यते यथा जलमानय इत्यस्य स्थाने उदकमानयेत्यपि वक्तुं शक्यते तर्हि यद्यग्निपदं सार्थकमेतस्मिन् मन्त्रे तर्हि अग्नि इत्यस्य स्थाने वह्नि प्रयोगोऽपि स्यादेव यदि न भवति तर्हि तन्मन्त्राणामानर्थक्यं सूचयति । इति कौत्सस्य प्रथमः पक्षः । द्वितीयाक्षेपरूपेण कौत्सः कथयति यद्यथा मन्त्राणां शब्दस्य परीवर्तनं कर्तुं न शक्यते तथैव तेषां क्रमपरिवर्तनमपि कर्तुं न शक्यते यथा – अग्निमीळे पुरोहितम् इत्यस्य स्थाने ईळे पुरोहितमग्निम् इति प्रयोगोऽपि कर्तुं न शक्यते सार्थकेषु पदेषु पूर्वापरप्रयोगः कर्तुं शक्यते यद्यनर्थकं स्यान्मन्त्राणां तदानीमेव तथा पूर्वापरप्रयोगस्य निषेधो वर्तत इति कौत्सस्य द्वितीयः पक्षः । तदनन्तरं कौत्सः प्रतिपादयति यद् "अथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते" । [6] "उरु प्रथस्वेति प्रथयति"[7] ,"प्रोहाणीति प्रोहति" । अर्थाद्यदि मन्त्राः सार्थका एव तदानीं तु ब्राह्मणग्रन्थैः तावती स्पष्टताया आवश्यकतैव न भवति यथा शतपथब्राह्मणग्रन्थे लिखितं यद् उरु प्रथस्वेति प्रथयति अर्थात् उरु प्रथस्व इत्यनेन मन्त्रेण क्रियमाणं कार्यं प्रथनमस्त्यतोऽग्रे लिखितम् उरु प्रथस्वेति प्रथयति यदि हि मन्त्राः सार्थकाः तदानीं तत्र इति प्रथयति इति लेखनस्यावश्यकतैव नास्ति किन्तु तथा नास्त्यतो ब्राह्मणग्रन्थेषु बहुत्र तथा निर्देशो दृश्यते । अपरञ्च प्रोहाणीति प्रोहति इत्यत्रापि प्रोहतीति लिखितमस्ति तेनापि ज्ञायते यन्मन्त्रा अनर्थका अत एव प्रोहति इति पदं तत्र लिखितम् इति कौत्सस्य तृतीयः पक्षः ।

अग्रे च कौत्सः स्वमतानुसारं वर्णयति यद् "अथाप्यनुपपन्नार्था भवन्ति ओषधे त्रायस्व एनम् । स्वधिते मैनं हिंसीः [8] इत्याह हिंसन् "। अर्थान्मन्त्रा असङ्गतार्थयुक्ताः भवन्ति यथा हे ओषधे ! त्वमेनं वृक्षं त्रायस्व । हे परशो ! त्वमेतस्य वृक्षस्य हिंसां मा कुरु । इत्येते मन्त्रे यजमानो वृक्षच्छेदनावसरे वदति । तर्ह्यत्र वृक्षस्य छेदनं क्रियते साक्षात् तथाप्युच्यत एनं त्रायस्वेति तत्कथं शक्यम् ? अतः कौत्सः कथयति मन्त्राणामर्थस्य तस्य प्रयोगस्य च कुत्रापि समानता न दृश्यते । मन्त्राणां सार्थक्यस्वीकरणे न कुत्रापि सङ्गतिः तदानीं तेषामानर्थक्यमेवोचितम् इति । इति कौत्सस्य चतुर्थः पक्षः । अग्रे च कौत्सो निगदति यद् अथापि विप्रतिषिद्धार्था भवन्ति । एक एव रुद्रोऽवतस्थे न द्वितीयः ।[9] असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् । [10] अर्थान्मन्त्राः परस्परं विरोधार्थकाः भवन्ति यथैकस्मिन् मन्त्रे उच्यते रुद्र एकैव । अपरस्मिन् मन्त्रे उच्यत एतस्यां भूमावसङ्ख्यातारुद्रास्सन्तीति । तथैव कुत्रचिदुच्यते हे इन्द्र ! त्वं सर्वथा शत्रुरहितो एवाऽसि । अपरत्रोच्यते सहस्रशः सेना इन्द्रेण जीताऽस्ति तर्हि विना युद्धेन तत्कथं शक्यम् । इति कृत्वा कौत्सः परस्परविरुद्धार्थानां प्रतिपादकत्वादनर्थकाः मन्त्रेति मनुते । इति कौत्सस्य पञ्चमः पक्षः । अग्रे च अथापि जानन्तं सम्प्रेष्यति ...। इत्यनेन कौत्सः कथयति यद्यः सम्यक्

---

[3] निरुक्त अ.१.५

[4] निरुक्त अ.१

[5] ऋ.१.१.१

[6] निरुक्त अ.१

[7] शत.ब्रा.१.१.६.८

[8] यजु.वा.सं.५.४२

[9] तै.सं.१.८.६.१

[10] य.वा.सं १६.५४

 ISSN: 2349-6002

यागादिक्रियाः जानाति तं प्रति पुनः पुनः कथनस्यावश्यकता न भवति तथापि तादृशाणां मन्त्राणां प्रयोगो भवति यथा अग्नये समिध्यमानाय अनुब्रूहीति। अर्थात् पूर्णप्रज्वलनान्तरमेव मन्त्रपाठः प्रारम्भः करोत्विति। तर्हि तत्तु ज्ञायत एव सर्वैरतस्तद्विधानमनर्थकम् इति कृत्वा मन्त्राणामानर्थक्यं प्रकटयति । अग्रे च अदितिर्द्यौ..इत्यादि मन्त्रोक्तादितिरेव सर्वम् इत्यादिकं परस्परविरुद्धं वर्तत अतो मन्त्रा अनर्थका एवञ्चाथाप्यविस्पष्टार्थाः भवन्तीत्युक्त्वास्पष्टार्थत्वादपि मन्त्रा अनर्थका इति कौत्सः प्रतिपादयति । इत्थं नैकाभिः युक्तिभिः कौत्सो मन्त्राणामानर्थक्यं साधयितुं प्रयत्नः करोति यास्कस्तु सर्वेषां खण्डनं कृत्वा मन्त्राणां सार्थक्यं प्रतिपादयति तदिदानीं पश्यामः।

मन्त्राणां सार्थकत्वनिरूपणम् – यास्कः कौत्सप्रतिपादितमन्त्रानर्थक्यं न स्वीकरोति यास्कः स्वमतमुपस्थाप्य कथयति यद् अर्थवन्तः शब्दसामान्याद् .....। अनेन यास्कः कौत्सस्य प्रथममतस्य खण्डनं करोति यदुक्तं कौत्सेन अनर्थकाः मन्त्रा इति। यास्कः कथयति यथा लोके यादृशो शब्दो वर्तते तादृश एव शब्दो मन्त्रेऽपि वर्तते तर्हि यदि लोके शब्दस्सार्थकः तर्हि किमर्थं मन्त्रे अनर्थकः ? अतो मन्त्रेऽपि शब्दः सार्थक एव तेन मन्त्राः सार्थका एव। अग्रे च यास्कः केवलानेनैव हेतुना न मन्त्राः सार्थकाः तत्र प्रमाणमपि वर्तते यथा क्रीलन्तो पुत्रैर्नप्तृभिः इति मन्त्रो विवाहावसर उच्यते तस्याशयो वैवाहिकजीवनारम्भे युगलस्य कृते शुभकामनाः दीयन्ते यद्युवां पति-पत्न्यौ कदापि वियुक्तौ न भव एवञ्च पुत्रपौत्रैस्सहानन्दमयजीवनं यापयेति। तर्हि यदि मन्त्रा अनर्थकाः तदानीं त्वत्र यः कोऽपि मन्त्रो वक्तुं शक्यते किमर्थम् एष एवानेनापि स्पष्टं भवति यन्मन्त्राः सार्थका एवेति।

कौत्सेन अशत्रुरिन्द्र जज्ञिषे[11] तथा शतं सेना अजयत् साकमिन्द्रः [12] इत्युभाभ्यां मन्त्राभ्यां परस्परविरुद्धार्थत्वात् मन्त्राः विप्रतिषिद्धार्था भवन्ति इति यदुक्तं तस्य समाधानरुपेण यास्कः कथयति यत् लौकिकेष्वप्येतद्यथाऽसपत्नोऽयं ब्राह्मणऽनमित्रोऽयं राजेति। अर्थात् लोकेऽपि वेदवदेव व्यवहारः दृष्यते यथा एतस्य ब्राह्मणस्य न कोऽपि शत्रुः , एषो राजा अजातशत्रुः वर्तते यद्यपि लोके तथा भवितुं न शक्नोति यस्य शत्रुमित्रे न भवतः यथोक्तं

मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः।
उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनहेतवः ॥ [13]

अर्थात् सम्पुर्णस्यास्य संसारस्य सर्वेषां बन्धनानां त्यागः कृत्वा वने निवासं कृत्वा यः केवलं स्वकर्मनिरतो भवति तस्यापि मुनेः केचन् शत्रवः केचन् च मित्राः भविष्यन्त्येवेति। तथापि अजातशत्रु इत्यादि यदुच्यते तत्तु स्वल्पशत्रुयुक्तस्य कृते आलङ्कारिकरुपेण प्रयुज्यते इति भावः। एवञ्च इन्द्रस्य यदेकत्वानेकत्वमुक्तं तत्तु ऐश्वर्येण देवैकानेकाः भवितुं शक्नुवन्ति। अपरञ्चोच्यते यास्केन यद् यथो एतन्नियतवाचो युक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्येतद्यथेन्द्राग्नी पितापुत्राविति। [14] अर्थाद्यदुक्तं कौत्सेन नियतानुपूर्व्या मन्त्राः भवन्ति तस्मादनर्थकाः तर्हि क्रमस्यापरिवर्तनता तु लोकेऽपि दृश्यते यथा इन्द्राग्नी , पितापुत्रौ इति च। यदि लोके शब्दानां निश्चितरुपेण क्रमो निर्धार्यते तदानीं वेदे किमर्थं न ? अपरञ्चात्र वक्तुं शक्यते यद् वेदमन्त्राः नियतछन्दयुक्ताः भवन्त्यतस्तत्र नियतक्रम आवश्यकोऽन्यथा छन्दोभङ्गो भवति। इति।

यदुक्तं कौत्सेन ब्राह्मणग्रन्थैः मन्त्राणामर्थज्ञानार्थं विधानं क्रियते तदप्ययुक्तं तदर्थं यास्कः कथयति यथो एतद् ब्राह्मणेन रूपसम्पन्ना विधीयन्त इत्युदितानुवादः स भवति । अर्थात् ब्राह्मणग्रन्थैर्यदुच्यते तत्तु वेदमन्त्रोक्तस्यानुवाद एव वर्तते न तु मन्त्रार्थज्ञानायेति । अपरं यदुक्तं कौत्सेन मन्त्रा असङ्गतार्थकाः भवन्ति वृक्षच्छेदनावसरे त्रायस्वैनमित्यादिभिः वाक्यैः यत् प्रतिपादितं तस्य समाधानरूपेण यास्कः कथयति यद्

“ यथो एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयेत” । अर्थाद्यदि छेदनावसरे मन्त्र उच्यते तदानीं तदहिंसा एव तत् वृक्षस्य विनाशो नास्ति तत्तु रक्षार्थमुच्यते । अग्रे उच्यते यास्केन “यथो एतज्जानन्तं संप्रेष्यतीति जानन्तमभिवादयते जानते मधुपर्कं प्राहेति” । यदुक्तं कौत्सेन जानन्तोऽपि विधानत्वात् अनर्थता भवति मन्त्राणां तन्न यतोहि लोकेऽपि जानन्तमभिवादयते यथा लोके शिष्यः गुरोरभिवादनावसरे वदति अभिवादयेऽहं ब्रह्मदेवः। तर्ह्यत्रापि गुरुः शिष्यं जानाति एव तथापि शिष्यः स्वनामोच्चारयति । तथैव विवाहावसरे “ओम् मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यताम्” । इति वारत्रयमुच्चार्य मधुपर्को दीयत इत्येतादृशाः प्रयोगाः विशेषध्यानाकृष्टकरणार्थमिति । तदनन्तरं यास्कः “यथो एतददितिः सर्वमिति लौकिकेष्वेप्येतद्यथा सर्वरसा अनुप्राप्ताः पानीयमिति [15]“। इत्यनेन कौत्सोक्त अदितिः सर्वम् इत्यनेन यत् प्रतिपादितम् विरुद्धार्थप्रतिपादकत्वादनर्थकाः मन्त्राः इत्यस्य खण्डनं क्रियते यास्केन यत् यथा लोके एकस्मिन् वस्तुनि सर्वे गुणाः आक्षिप्यन्ते तथैव वेदेऽपि स्यादिति यथा लोके उच्यते सर्वरसा पानीयमिति अर्थात् जलेऽस्मिन् सर्वेऽपि रसाः वर्तन्ते किन्तु जले वस्तुतस्तु न सर्वरससमावेशः

[11] ऋ.१०.१३३.२

[12] ऋ.१०.१०३.१

[13] सुभाषितम्

[14] निरुक्त अ.१.५

[15] निरुक्त अ.१.

तत्तु जलस्यमहत्वप्रदर्शनार्थमुक्तं तथैव अदिदिः सर्वमिति यदुक्तं तदपि वैशिष्ट्यार्थमेवेति ।

अन्ते च कौत्सेन यदुक्तं मन्त्राः अविस्पष्टार्थाः भवन्ति तस्य प्रत्याख्यानं कृत्वा यास्कः कथयति यथो एतदविस्पष्टार्था भवन्तीति नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधः स भवति ।[16] वस्तुतः कौत्सेनोक्तं पूर्वं यत् मन्त्रे केचन् शब्दाः अस्पष्टार्था एव भवन्ति यथा अम्यक्,काणुका,जारयायि इत्यादि अतः मन्त्राः अस्पष्टार्था इति । तस्य मतस्य खण्डनं कृत्वा यास्कः कथयति यदि अन्धपुरुषः स्थाणुं न पश्यति तर्हि तत्तु पुरुषापराधः न तु स्थाणोरिति तद्वदेव यदि मन्त्रोक्त वैशिष्ट्युक्त पदानां यदि अर्थः न ज्ञायते तत्तु पुरुषापराध एव मन्त्रास्तु सार्थका एवेति । इत्थं यास्केन कौत्सोक्त सर्वेषामपि आक्षेपाणां खण्डनपुरस्सरं मन्त्राणां सार्थकता प्रतिपादिता वर्तते ।

❖ मन्त्राणामानर्थक्यसार्थक्यविषये कौत्सयास्कोक्तमतयोः समीक्षा ।

कौत्स–यास्कयोः मन्त्रार्थविषयकः विवादः वेदार्थमीमांसायाः केन्द्रबिन्दुरिव दृश्यते। कौत्सः मन्त्राणां अनर्थकत्वं प्रतिपादयन् तेषां फलप्रदत्वं केवलं कर्मविशेषनिबद्धं मन्यते, न तु अर्थज्ञानसापेक्षम् । तस्य मतानुसारं मन्त्रा औषधिवद्भवन्ति—यथा औषधसेवने अर्थज्ञानस्यावश्यकता नास्ति तथैव मन्त्रेष्वपि शब्दार्थबोधो नापेक्षितः। कौत्सस्यायं दृष्टिकोणः सङ्कुचितः प्रतिभाति यतोहि मन्त्राणां नियतवाचित्वं, नियतानुपूर्व्यं, ब्राह्मणग्रन्थेषु अनुवादविधानं, अनुपपन्नार्थत्वं, विप्रतिषिद्धार्थत्वं, अविस्पष्टार्थत्वञ्च मन्त्राणां रहस्यरक्षणार्थं भवति ।

एकैकस्यापि मन्त्रस्य नैकविधार्थाः भवन्ति इति तु सर्वेऽपि जानन्त्यतो सामान्यनियमाभावे साक्षात् मन्त्राणामानर्थक्यं यदुच्यते तन्नोचितं सर्वथा । यतोहि वेदमन्त्राः छन्दोबद्धाः, स्वरनियन्त्रिताः, देवताविशेषसम्बद्धाश्च भवन्त्यतस्तेषां शब्देषु पर्यायप्रयोगस्य वा क्रमपरिवर्तनस्य निषेधः अनर्थकत्वसूचकः न अपि तु नियमविशेषसूचकः। तथैव ब्राह्मणग्रन्थेषु दृश्यमानं मन्त्रार्थानुवचनं न मन्त्राणामर्थहीनतां द्योतयति, किन्तु कर्मप्रयोगस्य स्पष्टतां साधयति । अनुपपन्नार्थत्वेऽपि बाह्यक्रियाविरोधः दृश्यते, तथापि मन्त्रोक्तः भावार्थः, संकल्पः, आलङ्कारिकता वा तत्र प्रमुखा भवति, न तु केवलं स्थूलार्थग्रहणम् । एवं कौत्सस्य सर्वाः युक्तयः कर्मप्रधानदृष्ट्या युक्ता इव दृश्यन्ते, किन्त्वर्थमीमांसायां ताः सर्वथा पर्याप्ताः न भवन्ति।

अतः यास्काचार्यः कौत्सस्य सर्वेषामपि आक्षेपाणां सूक्ष्मतया खण्डनं कृत्वा मन्त्राणां सार्थकत्वं प्रतिष्ठापयति। ''अर्थवन्तः शब्दसामान्यात्'' इति यास्कस्य सूत्रवाक्यं मन्त्रार्थमीमांसायाः आधारस्तम्भः वर्तते । यदि लोके शब्दा अर्थवन्तस्सन्ति, तर्हि ते एव वेदे कथमनर्थकाः स्युरिति तस्य तर्कः सर्वथोचितः । यास्कः दर्शयति यत् मन्त्रेषु नियतवाचित्वं वा नियतानुपूर्व्यं वा मन्त्राणामनर्थकत्वं न सूचयति, अपि तु छन्दः, स्वरः, देवता, प्रयोगपरम्परा च तस्य कारणं भवितुं शक्नुवन्ति। विप्रतिषिद्धार्थत्वं तु तत्त्व–व्यवहारभेदेन, आलङ्कारिकोपचारदृष्ट्या, देवतानामैश्वर्यविशेषेण च सम्यगुपपाद्यते।

विशेषतश्च यास्केन प्रतिपादितं ''नैष स्थाणोरपराधः'' इति दृष्टान्तेन मन्त्रार्थानवबोधस्य कारणं मन्त्रोपदिष्टशब्देषु न, अपि तु अध्येतृषु एव इति स्पष्टं भवति । मन्त्रेषु यद्यपि केचन् शब्दा दुर्बोधा दृश्यन्ते, तथापि तेषां व्युत्पत्त्या, निघण्टुनिरूपणेन, परम्परानुसारव्याख्यानेन च अर्थनिर्णयो भवत्येव। अनेन निरुक्तशास्त्रस्य अनिवार्यता सिद्ध्यति, यतोहि मन्त्राणां सार्थकत्वं तदध्ययनविना अवगन्तुं न शक्यते।

उपसंहारः - एवं समीक्ष्यमाणे निष्कर्षतः वक्तुं शक्यते यत् कौत्सस्य मन्त्रानर्थकपक्षः कर्मप्रधानपरम्परायां महत्त्वपूर्णसन्नपि वेदार्थगाम्भीर्यं पूर्णतया न प्रकाशयति, तत्रैव यास्काचार्यस्य मन्त्रसार्थकपक्षः वेदस्य अपौरुषेयत्वं, शब्दस्यार्थवाहकशक्तिं, तथा च वैदिकभाषायाः वैज्ञानिकस्वरूपं दृढयति । अतः मन्त्राः न केवलं फलदायिनः , अपि तु गूढार्थयुक्ताः सन्तीति यास्कस्य सिद्धान्तः अधिकं प्रौढः, समीचीनः, दार्शनिकदृष्ट्या च सुदृढः इत्यत्र सारः

सन्दर्भग्रन्थसूची

[1] यास्कप्रणीतम् निरुक्तम् (कश्यपप्रजापतिकृतनिघण्टुभाष्यरूपम्) चौखम्बा संस्कृत

[2] निरुक्त-पूर्वार्ध –प्रो.ज्ञानप्रकाश शास्त्री , परिमल पब्लिकेशन

[3] निरुक्तम् शशिप्रभा हिन्दिव्याख्योपेतम् चौखम्बा संस्कृत सीरीज

[4] निरुक्त निर्वचनानि व्याख्याता - आचार्य उदयनो मीमांसकः,परिमल पब्लिकेशन

[5] वैदिकसूक्तसंग्रह - डो.देवेन्द्रनाथ पाण्डेय

[16] निरुक्त अ.१.